यवन जातक – Edited and published by पं. हरी बापूजी जोशी – ~~brittle condition~~ at संगमेश्वर प्रेस – Brittle condition so the total leaves are tissued. ~~Loose~~ leaves lithoprint edn., Mumbai, 1788 Saka era.

(10)

Bill No. 3/07-08

91

2008 – 0245





॥ अथयवनजातकप्रारंभ ॥





यं॰ श्रीगणेशायनमः॥ ॥अथयवनजातकप्रारंभः॥ ॥अथपत्रिदोआशिर्वादश्लोकः॥सजयति॰ जा॰
१ ॥१॥यस्योदयास्तसमये॰॥२॥श्रीमत्पंकजनीपतिःकुमुदिनीप्राणेश्वरोभूमिभूःशशांकिःस्फुरा
जवंदिनपदोदैत्येंद्रमंत्रीशनिः॥स्वर्भानुःशिखिनांगणोग पापनिर्मूलीशलक्ष्मीधरास्तंरक्षंतुसदैवय
स्यविमलापत्रिमयालिख्यते॥३॥आयुःश्रीस्फुरत्कांतिकीर्तिजननीमांगल्यपुष्टिप्रदापुण्याहेवि
दितेसखेचरगणालेख्यापठेपत्रिका॥देवज्ञेनस्फबुद्धिनाविरचिताजन्मादिसंस्मारिनाज्ञानेजन्मनि
पूर्वजंकलमलंपत्रीमयालिख्यते॥४॥गणनाथेरविमुख्यखेचराःकुलदेवीविधिविष्णुशंकराः
॥उदयांशाधिपतिश्चकुर्वतांचिरमायुःखलुयस्यपत्रिका॥५॥यस्यनास्तिखलुजन्मपत्रिकाया
शुभाशुभफलप्रकाशिनी॥अंधकंभवतितस्यजीवितादीपहीनमिवमंदिरंनिशि॥६॥यदुपचित
मन्यजन्मनीशुभाशुभंतस्यकर्मणःप्राप्तिं॥व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइव॥७॥

विधात्रालिखितायासाललाटेक्षरमालिका ॥ देवज्ञस्तांपठेत्प्राज्ञोहोरानिर्मलचक्षुषा ॥ ८ ॥ नमयाविधि
नयंत्रंनमयास्थापितायदि ॥ परोपदिष्टवेलायांलिख्यतेजन्मपत्रिका ॥ ९ ॥ आदित्याद्याग्रहाःसर्वेस
नक्षत्राःसराशयः ॥ सर्वान्कामान्प्रयच्छंतुयस्यैषाजन्मपत्रिका ॥ १० ॥ असौदेवद्विजकुलदेव्याःप्रसा
दाद्दीर्घायुर्भूयात् ॥ ॥ स्वस्तिश्रीनृपशालीवाहनशके ॥ अमुकसंवत्सरे ॥ अमुकायने ॥ अमुकऋ
तौ ॥ अमुकमासि ॥ अमुकपक्षे ॥ अमुकतिथौ ॥ अमुकवासरे ॥ अमुकजन्मनक्षत्रे ॥ अमुकचरणे ॥
अमुकयोनौ ॥ अमुकगणे ॥ अमुकमहानक्षत्रे ॥ सूर्यर्क्षात्पुरुषाकारचक्रे ॥ अमुकस्थानेपतितं ॥ ॥
फलं ॥ ॥ अमुकप्राप्तिः ॥ अमुकराशिस्थितेचंद्रे ॥ अमुकराशिस्थितेसूर्ये ॥ अमुकयोगे ॥ अमुकक
रणे ॥ एवंपंचांगशुद्धौतद्दिनेदिवारात्रौवा ॥ अमुकलग्नवहमाने ॥ लग्नाधीपेअमुके ॥ राश्याधिपेअमुके
॥ अमुकांशे ॥ अमुकद्रेष्काणे ॥ एवंशुभग्रहावलोकितकल्याणोदयवेलायांश्रीमद्गोमारमणचरण



प० सेवापरांगतः करयोराजमान्यराजेश्री अमुकानां भार्याउभयकुलानंददायिनीरमणिश्चंद्रजरत्नंकन्यार- आ०
२ त्नवाप्रसूतः ॥ अस्याभिधानमवकहडचक्रे अमुकनामप्रतिष्ठितं ॥ असौदेवद्विजकुलदेव्याः प्रसा
दाद्दीर्घायुर्भूयात् ॥ अथास्यप्राकृतजन्मकाललिख्यंते ॥ अस्यजन्ममासोअमुकः ॥ जन्मतिथीअ-
मुका ॥ जन्मनक्षत्रं अमुकं ॥ जन्मराशिअमुकः ॥ अथास्ययात्रादौवर्ज्यं ॥ घातवारतिथीनक्षत्रचंद्र
चलेख्या ॥ अथजातस्यजंतोः षट्धिष्ण्यानि ॥ जन्मभादशमं १० कर्मभंसांघातंषोडशभं १६ अष्टा
दशं १८ सामुदायंत्रयोविंशं २३ विनाशभं ॥ मानसर्क्षंपंचविंशं २५ षड्नक्षत्रभर्काभिनिं ॥ एतेषुनक्ष
त्रेषुषट्सुपापग्रहाधिष्ठितेषुमत्स्यपीडाभवेत् ॥ तच्छांत्यैदानंजपहोमोवसकारयेत् ॥ अथजन्म
समयेतत्कालिकाग्रहाः सलग्नालिख्यंते ॥ ग्रहान्सलेख्या ॥ ग्रहचक्रंकार्यं ॥ तद्यथालग्नात्द्वादश
राशिषुग्रहाः रव्यादयस्थाप्याः ॥ अथजातस्यबालस्यपंचांगफलानिलिख्यंते ॥ तत्रादौसंवत्सर

फलं ॥ प्रभवादिकुजातानांनराणांयत्कजैस्फुटं ॥ फलंक्रमेणतत्सर्वंकथ्यंतेचाथशोभनं ॥ संग्रहः सर्ववस्तूनां
पुत्रसंपत्तिमेवच ॥ दीर्घायुर्भोगसंपन्नः प्रभवेजायतेनरः ॥ १ ॥ उत्पन्नभोगभोगीस्यात्कलावांश्चारुद-
र्शनः ॥ पंडितोराजपुत्रश्चविभवेयेनरोभवेत् ॥ २ ॥ सुभगः कांतिमान्भोगीपुत्रदारसमन्वितः ॥ विद्वा
न्सर्वगुणोपेतः शुक्लसंवत्सरेनरः ॥ ३ ॥ सदानंदपरः सत्यवादीपरहितेरतः ॥ गुणीख्यातः सुखीमा
नीप्रमोदेजायतेनराः ॥ ४ ॥ प्रजानांपालकोधर्मीकृपासत्यसमन्वितः ॥ देवब्राह्मणभक्तश्चप्रजापति
समुद्भवः ॥ ५ ॥ कांतश्रीमान्सुखीमानीगीतप्रियश्चवल्लभः ॥ दीर्घायुर्बहुपुत्रस्यादंगिरावत्सरोभवेत्
॥ ६ ॥ श्रीमान्शुभमतिःशास्त्रपरागः सुहृदः प्रियः ॥ बलवान्कीर्तिमांश्चैवजायतेश्रीमुखेनरः ॥
॥ ७ ॥ भावसंवत्सरेजातोनरोभवतिसौख्यभाक् ॥ यशस्वीदाननिरतः सर्वलक्षणसंयुतः ॥ ८ ॥ कां
तिः सर्वगुणोपेतोदीर्घायुर्दीनवत्सरः ॥ ख्यातः शुभमतिश्चैवयुवाब्देपुरुषोभवेत् ॥ ९ ॥ व्यापारकुश-



लोभूपमानीशत्रुनिबर्हणः॥अरोगीधनलुब्धश्चधानावर्षेनरोभवेत्॥१०॥समर्थःसर्वलोकेषुगुरुभ
क्तोनिसंदरः॥ईश्वरेजायतेमर्त्यःसदाक्रोधपरायणः॥११॥वणिकृदृषिबलश्चामकर्नाधान्यधनैर्यु
तः॥जायाप्रश्नसक्तहृद्धिश्चबहुधान्येप्रजापतौ॥१२॥सेनानीनृपतेर्मंत्रीरथध्वजैःसुकीर्तिनः॥शा
स्त्रसंग्राहकश्चैवप्रमाथीवत्सरेभवेत्॥१३॥उग्रःप्रतापशीलश्चपररागविमर्दनः॥पापकर्मरत
श्शूरोविक्रमेब्देनरोभवेत्॥१४॥मंदोलसोहास्यमुखोभारवाहःकृषेबलः॥परकर्मरतोनित्यंवृषा
ब्देबालकोभवेत्॥१५॥चित्रभानुसमुद्भूतोनरोविद्यामतिर्भवेत्॥नीतिमान्बुद्धिमान्श्रीमान्
स्वामिभक्तःप्रियंवदः॥१६॥पिंगदृक्पिंगकेशीचगोस्वल्पश्चविभूतमः॥सुभानुवत्सरेजातः
कांतिमाननिदुर्जनः॥१७॥चंचलोचपलोहृष्टःस्वारणेब्देनरोभवेत्॥धूर्तःपापरतःक्रूरोदरिद्री
निष्ठुरःसदा॥१८॥मृदुभाषीराजमानीराजसःशुभलक्षणः॥प्रभुर्धनसमृद्धिश्चपार्थिवेवत्स



रेनरः॥१९॥द्यूतमद्यपरस्त्रीणांव्यसनैर्धनवर्जितः॥व्ययसंवत्सरे सर्वचौरपापमतिर्भवेत्॥२०॥स्व
कर्मनिरतःशास्त्रपारगोनिविचक्षणः॥ह्रस्वःस्थूलतनुःश्यामःसर्वजित्प्रभवोनरः॥२१॥बहुभृत्य
धनीकामीभोगीमिष्टान्नभुक्लघुः॥सर्वधारीजातनरःसर्वाधारपरोभवेत्॥२२॥कुटुंबकलहःक
र्तापरदेशरतःसदा॥सर्वलोकविरोधीत्वविरोधीवर्षसंभवः॥२३॥कृष्णवर्णतनुःक्षामःकराला-
स्योतिनिर्घृणः॥विकृष्टपर्वोरुक्षश्चविकृतेब्देभवेनरः॥२४॥धूलीधूसरसर्वांगोदीर्घघर्घरसंभ-
वात्॥कामातुरश्चसंजातःखरसंवत्सरेनरः॥२५॥सदानंदःसदातुष्टःवापीकूपतडागकृत्॥
अंन्नदानासक्तशीलश्चनरोनंदनवर्षजः॥२६॥शूरःसंग्रामशीलश्चख्यातःकीर्तियशोन्वितः॥पृ
थ्वीपतिर्जयीभूपोविजयेब्देनरोभवेत्॥२७॥विद्वान्वादीलोकमानीसर्वशास्त्रविशारदः॥पू-
जामाप्नोतिसर्वत्रजयवर्षेप्रजायते॥२८॥उत्पन्नभोगभोक्ताचकामिनीवल्लभःसुखी॥सर्वाभरण



य
४

भूषाढ्योमन्मथेनन्नरोभवेत् ॥ २९ ॥ शठः क्रूरमतिर्दुष्टेहिंसकोवृषलीपतिः ॥ वक्रोदुष्टकचः भाषीदुर्मुखे आ·
द्धेभवेन्नरः ॥ ३० ॥ धनधान्यचभोगीचवस्त्रवस्त्रसमृद्धिमान् ॥ कलावान्सगुणाढ्यश्चहेमलंबेसमुद्भ
वः ॥ ३१ ॥ नदीकुब्जोलसाद्रुःखोम्लेच्छगाम्यातिरोगवान् ॥ निरतः पापकर्मेषुविलंबेवत्सरेशिशुः ॥
॥ ३२ ॥ अविवेकीमहागर्वीनिपातनकुशलः खलः ॥ विकारीवत्सरेजाताः भाषीभववित्रंचलः ॥ ३३ ॥
चंचलोमदनेसक्तः परसेवारतः सदा ॥ निद्राघूर्णितनेत्राश्चशार्वरीवर्षसंभवः ॥ ३४ ॥ चंचलः भूप
लः कामीपरसेवारतः सदा ॥ हंताबहुजनानांचजातोवर्षेप्लवाब्दके ॥ ३५ ॥ शुभगः शुभकर्माचविद्या
धर्मपरायणः ॥ दीर्घायुर्धनसंयुक्तः शुभकृद्वर्षजः पुमान् ॥ ३६ ॥ सर्वत्रविजयीचारुर्हास्यप्रियगुणा-
न्वितः ॥ दयालुः शुभकृद्वर्षेजातोभवतिमानवः ॥ ३७ ॥ पिंगाक्षः पिंगकेशीचमंदगामीस्थिरोलुपः
॥ परकर्मनिहंताचक्रोधीसंवत्सरेनरः ॥ ३८ ॥ विश्वावसुसमुद्भूताः भजनानांसमृद्धिमान् ॥ शोभनः

सर्वगुणोपेतोदाता।मिष्टान्नभुक्शुचिः॥ ३९॥ परदाररतः श्चोरः पारुष्यवचनः कृशः॥ पराभवसमुद्भूतो-
धनधान्यविवर्जितः॥ ४०॥ प्लवंगवत्सरेजातः किलकष्टीचदुर्बलः॥ पांडुरोदुष्टरोगश्चस्त्राचारोहिन-
कृत्सुधी॥ ४१॥ मध्यमरूपः प्रियवाक्क्षधिनोमर्षिनोमहान्॥ किलकेजायतेबालः स्थूलःदन्तूकृदिम
स्तकः॥ ४२॥ पंडितोधनभोगीचदेवतातिथिपूजकः॥ तामसः कृशदेहश्चनरः सौम्येप्रजायते॥ ४३॥ नी
चवृत्तिः श्चुचिः काम रहितः परदेशगः वेदनिंदापरः क्रोधीसाधारणसमुद्भवः॥ ४४॥ विरोधीसर्वलो
कानांपितृभक्तिविवर्जितः॥ विरोधिकृद् सरेचजातिसंकरकृद्भवेत्॥ ४५॥ विद्वान्सर्वकलाभिज्ञो
व्यापारकुशलः सुधीः॥ राजमानीदानशीलः परिधावीसमुद्भवः॥ ४६॥ प्रमाथीवत्सरेजातोनरोबंधु
विरोधकृत्॥ कुटुंबघातकोलुब्धः पापकर्मरतः सुधीः॥ ४७॥ बहुभार्योतिचतुरः आनंदवत्सरेभवे
त्॥ पुत्रवान्धनवान्जातः पुत्रवृध्धिसमन्वितः॥ ४८॥ सर्वभक्षीकृतांतश्चवर्णावर्णविवर्जितः॥

य॰ ५ हिंसापरस्संतापीराक्षसेब्देनरोभवेत् ॥ ४९ ॥ वैश्यवृत्तिः स्वसधनः कुटुंबवत्सलः कृषिः ॥ जनसौख्यक जा॰
रोनलोजातोनलाख्यवत्सरे ॥ ५० ॥ कपिलदृक्कुशिरोरोगीमहोद्यमपरोभवेत् ॥ उोकांतकारकः कालपिंग
लेब्देनरोभवेत् ॥ ५१ ॥ कालयुक्तसमुद्भूतोनरोभवतिनिरोगभाक् ॥ ऋत्विसिद्धिकृतोनित्यंगीतवाद्यवि-
शारदः ॥ ५२ ॥ मैत्रीकीर्तिपरोदातधनधान्ययुतोभवेत् ॥ दीर्घाङ्गर्बहुपुत्रश्चसिद्धार्थीवर्षजः पुमान्
॥ ५३ ॥ भयंकरवपुःपापीपिशुनोघातकृद्भवेत् ॥ रौद्रसंवत्सरेजातोनरः स्वल्पाकृपोधनः ॥ ५४ ॥ मू-
र्खः क्रूरमतिः कामीस्वकीयवचनः प्रियः ॥ अदातधनलुब्धश्चदुर्मतीमभिवत्सरे ॥ ५५ ॥ नित्योत्साही-
क्षितिपतिर्गजाश्वरथसैनिकः ॥ वादित्रध्वनिसौख्याढ्योदुंदुभीवर्षजोभवेत् ॥ ५६ ॥ शरीरेचमहारोगी-
शत्रुपीडानिपीडितः ॥ दुःकर्मकृन्नरोजातोरुधिरोद्गारिवत्सरे ॥ ५७ ॥ नेत्ररोगीमंददृष्टिर्दक्षोधमरत
सदा ॥ दुर्जनः कामबहुलोरक्ताक्षीवर्षजः शिशुः ॥ ५८ ॥ तामसोनिर्घृणः क्रोधीधातुवादीभयंकरः ॥ ५

क्रोधनाब्देजाननरो वंचकः पापबुद्धिमान्॥ ५९॥उत्पन्नार्थःक्षयकरः परसेवारनः खलः॥क्षयसंवत्सरेजातो
नरोधर्मविवर्जितः॥ ६०॥ ॥इतिश्रीयवनजातकेसंवत्सरफलं॥ ॥अथायनफलं॥ ॥प्रियायुतःसौ
ख्ययुगान्वितश्चदीर्घायुराचारमतिप्रवीणः॥देवद्विजाचार्यपदानुरक्तःसौम्यायनेजाननरोभवेच्च॥ १ ॥-
॥ ॥इतिउदगयनफलं॥ ॥अथदक्षिणायनफलं॥ ॥क्रूरःशठोरोगरुतसदेहः पापत्मकंचौररतः
कृशश्च॥ पौश्चल्यकृत्क्रूरमतिः शिशुःस्याद्दाक्षिण्यजश्चैवनरोपदास्यात्॥ २ ॥इतिदक्षिणायनफलं
॥ अथऋतुफलं॥शिशिरेजायनेमर्त्योबलसौख्यचिरायुषः॥मिष्टान्नभूश्चैवनरोदंतरोगीप्रजायते॥१॥
सुखीभोगीगुणीकांतः सदावसनवान्भवेत्॥वसंतर्तौजाननरोदानकीर्तिःपरोभवेत्॥ २॥ वापीकूपत
डागमदेवालयपरोभवेत्।वेदविद्वान्नदातान्वग्रीष्मर्तौजायनेनरः॥ ३॥देशग्रामप्रजाध्यक्षःकृषिकर्ताम
हद्धनिः॥सस्यसंग्रहणेदक्षोवर्षर्तौजायनेनरः॥ ४ ॥व्यापारकुशलोमंत्रीधर्मिष्ठःसत्यवाक्शुचिः॥ पं-



य॰ ६

डितोगुणवान्धीरःशरदृतुसमुद्भवः॥५॥श्लक्ष्णांगःपुत्रवान्वाग्मीधर्मिष्ठःसत्यवाक्कविः॥भुंजतेमिष्ट
मन्नंचहेमंतेनभवेन्नरः॥६॥ ॥इतिऋतुफलं॥ ॥मेषलग्नोदयेजातोगुरुभक्तःप्रियंवदः॥गुणीकांतः
प्रियालुब्धःशूरःसर्वजनःप्रियः॥१॥वृषोदयेनरोजातोधनीकांतःप्रियंवदः॥लुब्धःकामीगुरुर्भक्तोमे
धोमानीमहाबलः॥२॥मिथुनोदयसंजातोज्ञानीयजनवत्सलः॥नानार्थविसमाकःकोदीर्घस्त्रीनिमर्दकः
॥३॥कर्कलग्नोदयेजातोधर्मिष्ठोगुरुवत्सलः॥मिष्टान्नभक्ष्यसंभोगीसौभाग्यस्वजनप्रियः॥४॥सिंह
लग्नोदयेजातोभोगीशत्रुविमर्दकः॥स्वल्पोदयोल्पपुत्रश्चसोत्साहीरणविक्रमः॥५॥कन्यालग्नोदये
जातोनानाशास्त्रविशारदः॥सौभाग्यधनसंपन्नःसत्यवादीनृपप्रियः॥६॥तूलालग्नोदयेजातःश्र
द्धोधीधर्मनायकः॥प्रजावान्कच्छधर्मस्थधनाढ्योधनवर्जितः॥७॥अलिलग्नोदयेजातःशौर्यवान्मृ
दुमानसः॥विज्ञानज्ञानवेत्ताचविद्वेषीविग्रहीकृधीः॥८॥धनलग्नोदयेजातोनीतिवान्धनवान्सुधीः

श्री॰

कुलमध्येप्रधानोहिप्राज्ञोभृत्येषुपोषकः ॥ ९ ॥ मृगलग्नोदयेजातोनीचकर्माबहुप्रजाः ॥ लुब्धो
लसोषटोदीनःस्वकार्यस्सुतनाधमः ॥ १० ॥ कुंभलग्नोदयेजातोवित्तवानतिसौहृदः ॥ परदाररतोनि
त्यंमृदुकार्येमहान्सुधीः ॥ ११ ॥ मीनलग्नोदयेजातोप्रभुवाक्येषुबुद्धिमान् ॥ अल्पकामोतिगौरश्च
प्रजावांश्चैवधार्मिकः ॥ १२ ॥ ॥ इतियवनजातकेमेषादिलग्नफलं ॥ ॥ अथग्रहभावफलानि ॥
लग्नस्थितोदिनकरःकुरुतेंगपीडांपृथ्वीसुतोवितनुतेविधिरप्रकोपं ॥ छायासुतःप्रकुरुतेबहुदुः
खभाजंजीवेंदुभार्गवबुधाःसुखकांतिदाःस्युः ॥ १ ॥ दुःखावहाधनविनाशकराःप्रदिष्टा वित्त
स्थितारविशनैश्चरभूमिपुत्राः ॥ चंद्रोबुधःसुरगुरुर्भृगुनंदनोवासर्वेधनस्यनिचयंकुरुतेधन-
स्थाः ॥ २ ॥ भानुःकरोतिनिरुजंरजनीकरोवाकार्यान्विवक्षितिसुतःप्रचुरःप्रभावं ॥ सितिबुधः
सुधिषणःसुविनीतदोषःस्त्रीयांप्रियंरविसुतोभृगुजःस्तृतीयः ॥ ३ ॥ आदित्यभौमशनयः

प स्फुरवर्जितांगं कुर्वंति जन्मनि रतं स्फुरितं चतुर्थः॥ चंद्रोबुधः स्फुरगुरुर्भृगुनंदनो वा सौरस्थधियं नृपति गा.
७ नासमनंतमहन्ति ः॥४॥ कुबेरविभवं सुरकोपमानं तिं बुधोपिनिः संतनिशनिधरा तनुजो सुतस्थं ॥ शुक्रेंदु
देवगुरवः स्फुरधामसंस्था कुर्वंति पुत्रनिवहं स्फुरितं सुरूपं ॥५॥ मार्तंडभूमितनुजौ ह्यलशत्रुपक्षं
पंगुं वरं रिपुगृहे नृपपूजनीयं ॥ शुक्रेंदुजौ मतिविहीनमनः स्फुरोगं जीवः करोति विकलं स्फुरवैभवांकं
॥६॥ लग्नाधिपश्च भौमशनयः किलसप्तमस्थाः कुर्वंति दुःखनिवहं तनुसंततिं च ॥ जीवेंदुशुक्रविबुधैस्त
दुपुत्रफलं धर्मान्वितं जनमनोहररूपवेद्यं ॥७॥ सर्वेग्रहा दिनकराभिमुखा नितांतं मृत्युस्थिता वि
दधतो किल दुःखवृत्तिं ॥ शस्त्रोपघातपरिपीडितदृष्टमात्रं विद्याविहीनमतिरोगगुणैरुपेतं ॥८॥ ध
र्मस्थिता रविशनैश्चरभूमिपुत्राः कुर्वंति धर्मविलयं जनयंति शून्यं ॥ चंद्रोबुधो भृगुसुतश्च सुरेंद्रमं
त्री धर्मक्रियासमधिकं कुरुते मनुष्यं ॥९॥ आदित्यभौमशनयः किल कर्मसंस्थाः कुर्वंति नरं व



हुलकर्मकरंदरिद्रं ॥ चंद्रः सुकीर्त्तिमुशनाबहुवित्तयुक्तंरूपान्वितंबुधगुरुः शुभकर्मलक्ष्म्या ॥ १० ॥ ला
भस्थितोदिनपतीनृपरूपरूपंधारापतिर्बहुधनंक्षितिजःक्षितीशं ॥ सोम्योविवेकवसतिंसुभगंच-
जीवः शुक्रःकरोतिसधनंरविजः सुकीर्त्ति ॥ ११ ॥ सूर्यःकरोतिपुरुषंव्ययगोविशीलंकाणंशशीसि
तिसुतोबहुपापभाजं ॥ चंद्रात्मजोगतधनंसगुरुः कृशांगंशुक्रोबहुव्ययकरंरविजः सुतीव्रं ॥ १२
॥ १२ ॥ इतिग्रहभावफलानि ॥ ॥ अथमासफलानि ॥ ॥ ब्रह्मचर्यरतोनित्यंवेदाध्ययनतत्परः ॥
गुरुदेवद्विजातीनांभक्तश्चैत्रसमुद्भवः ॥ १ ॥ सर्वलक्षणसंयुक्तोदीर्घदर्शीकलानिधिः ॥ सात्विकश्चि
रजीवीचवैशाखेजायतेनरः ॥ २ ॥ निपुणःसर्वकार्येषुनिर्मासश्चपरीक्षकः ॥ क्रयविक्रयकृन्नित्यं
भवेज्ज्येष्ठेचमानवः ॥ ३ ॥ निर्धनोबहुभुक्कृषिहलकर्मरतःसदा ॥ व्याधितोमूर्खबुद्धिश्चभवेदाषा
ढजोनरः ॥ ४ ॥ श्रावणेजायतेमर्त्योवेदकर्मविशारदः ॥ पुत्रदारधनैर्युक्तोसर्वलोकेसपूजितः ॥ ५

य भोगीदाताकृशोदीर्घोगौरकामीबहुस्त्रियः॥ सुवचान्धनवान्श्रीमान्नरोभाद्रपदेभवेत्॥ ६॥ आश्वि जा
८ नेचनरोजातोविद्वान्भूपप्रियोभवेत्॥ बहुभृत्यस्त्रियाषक्तोबहुपत्नोल्पजीवितः॥ ७॥ नानालोकप्र
सुखिश्चकुचित्तात्मकश्चोलसः॥ कार्तिकेजायतेनित्यंब्रह्मचर्यरतोभवेत्॥ ८॥ तीर्थयात्रारतोनित्यंसं
न्नदीक्षापरायणः॥ मार्गमासेभवेन्मर्त्योसदाशास्त्रविशारदः॥ ९॥ पौषमासेसमुत्पन्नोनरोदुःख
परोभवेत्॥ सर्वस्वरहितोगुप्तःपापमार्गेरतःखलः॥ १०॥ योगीश्वरस्तपोनिष्ठोवेदवेदांगपारगः॥
शांतोदयान्वितोदक्षोनरोमाघेप्रजायते॥ ११॥ सुकुमारःसदाभोगीकामिनीवल्लभःसुखी॥ फाल्गु
नेजायतेमर्त्योगजाश्वनरभूषितः॥ १२॥ ॥इविचवनजातकेमासफलं॥ ॥अथदिनरात्रिफलं॥
तेजस्वीपितृसादृश्यश्चारुदृष्टिर्नृपप्रियः॥ बंधुप्रियोधनाढ्यश्चदिवाजातोनरोभवेत्॥ १॥ मंदरूप
हुकामार्तःक्षयरोगीमलीनसः॥ क्रूरात्माछिंनपापश्चनिशीजातोनरोभवेत्॥ इतिदिवारात्रिफलं॥ ॥ ८

अथपक्षफलं ॥ शुक्लपक्षेनरोजातोदीर्घायुः पुत्रवान्भवेत् ॥ बहूनांपालकोदातासुहृन्मानीस्त्रियाजितः ॥ १
॥ अलसोमलिनोद्वेषीनिंदकोग्रामभाषकः ॥ कृष्णापक्षेभवेन्मर्त्यः सर्वधर्मबहिष्कृतः ॥ इतिपक्षफलं ॥ अथ-
तिथिफलं ॥ प्रतिपद्दिवसेजातोभाग्यवान्गुणवान्भवेत् ॥ स्त्रीसौख्यं वेश्मसौख्यंच वर्षाशीतिमहायुषः ॥
॥ १ ॥ द्वितीयादिवसेजातोनरः सत्यपरोभवेत् ॥ जनानंदपरः शूरः शास्त्रकर्मरतोभवेत् ॥ २ ॥ तृतीयायां
नरोजातः स्त्रीलोभः कृपणः श्चलः ॥ घनोपवासनिरतोसत्यवादीबलान्वितः ॥ ३ ॥ चतुर्थ्यांतुनरोजातः
लुब्धपिशुनवान्भवेत् ॥ चंडः साहसिकः शूरः बालवित्तशठान्वितः ॥ ४ ॥ पंचम्यांतुनरोजातोदीर्घायुः पु-
त्रवान्भवेत् ॥ महामतिः स्थिरः शूरः सत्यवादीजितेंद्रियः ॥ ५ ॥ षष्ठ्यांचैवनरोजातोव्रणांकिततनुस्थिरः ॥
स्त्रीलोलुपोनिसुहृदोविद्याकीर्तियुतोभवेत् ॥ ६ ॥ सप्तम्यांतुनरोजातोधनवान्गुणवान्भवेत् ॥ गुरुदेवा
र्चनपरः सदाचारोदृढव्रतः ॥ ७ ॥ अष्टमीदिवसेजातोसदारनिरतोभवेत् ॥ बहुवादीत्वचपलश्चलचित्तोनि-



१९ निष्ठुरः॥८॥ कामयुक्तो महाश्वरोगी न नृत्यरतः सदा॥ शत्रुमर्दी महाक्रोधी नवम्यां जायते नरः॥९॥ दशम्यां जा.
९ जायते मर्त्यो लोके व्यापारकोविदः॥ कलाशास्त्रेषु कुशलः सत्यवादी दृढव्रतः॥१०॥ एकादश्यां नरो जातो दु
राचारोतिदुःसहः॥ सुभगो रतिलोलश्च वस्त्रभोजनतत्परः॥११॥ द्वादश्यां तु नरो जातो स्त्रीजितो धातुमान्भ
वेत्॥ व्रतोपवासनियतः सधान्तुमतिमान्भवेत्॥१२॥ त्रयोदश्यां नरो जातो महाशुद्धः सर्वकर्मसु॥ बुद्धि
मान्व्याधिनिर्मुक्तः सदाबन्धुयुतो भवेत्॥१३॥ चतुर्दश्यां नरो जातो पूर्णांगः कस्तिदो भवेत्॥ सदाहृष्टमनः
कामी सुभगो निरयान्वितः॥१४॥ अमायां तु नरो जातो शास्त्रोद्धार्त्तिगतः सुखी॥ सुभगो बलहीनश्च चिन्ते बहु-
समाकुलः॥ ॥इति तिथिफलं॥ ॥अथ वारफलं॥ ॥अथातः संप्रवक्ष्यामि वासराणां च जातकं॥ शृणु य-
त्नेन देवस्य नराणां च विशेषतः॥१॥ अल्पकुंचितमूर्धा च मुखे पित्ताकृतिस्तथा॥ क्षात्रवृत्तिं सुरूपश्च मधुपिंग
लकांतिमान्॥ इति सूर्यफलं॥ स्थिरः प्रचंडो स्वरश्च रक्तः श्यामतनुः शुचिः॥ पित्ताधिको नित्यतुरो जनयेद्रवि



वासरे ॥ २ ॥ इतिसूर्यफलं ॥ सौम्यो निकांतोमधरोपिशंगोनिकृशस्तनुः ॥ युवान्नसूक्ष्मकेशाश्चप्रवासा
कुंविनोगुणी ॥ १ ॥ सोमवारेनरोजातः सात्विकः क्षात्रवृत्तिमान् ॥ ह्रस्वकायोन्तिगौरश्चपृथुवक्षाःसबु-
त्तिमान् ॥ इतिसोमवारफलं ॥ क्षात्रवृत्तिसमायुक्तोजनयेद्भौमवासरे ॥ रक्तायरक्तलोचनो वाग्यतो
मरक्षकः ॥ इतिभौमः ॥ श्यामवर्णोमहागौरकांतिमान्स्फुटशक्तसुधीः ॥ निपुणोवर्तुलः शीरःपादश्चै
वतथाकटिः ॥ रूपवान्मतिचाकल्योजनयेद्बुधवासरे ॥ १ ॥ इतिबुधः ॥ सुधीरोबहुलोकेशःकालशा
स्त्रविशारदः ॥ प्रगल्भंकुशलोधीरःसभवेत्गुरुवासरे ॥ १ ॥ इतिगुरुः ॥ मच्छिन्नकार्यक्रमनिर्जातःशुक्र
स्यवासरे ॥ सुधीसदेशकालज्ञःकलाशास्त्रविशारदः ॥ १ ॥ इतिशुक्रस्य ॥ दीनःकृशांगपरमदीर्घाल-
स्योदुरासदः ॥ वातनाधिकोनीचकर्मामूर्खस्थूलनखत्वचः ॥ १ ॥ रुक्षोदुर्बलदेहश्चमलिनोनिचलःखलः
रौद्रःक्रोधीराक्षसश्चजनितःशनिवासरे ॥ २ ॥ इतिशनिवारफलं ॥ अथनक्षत्रफलं ॥ अर्थवान्श्चापि

प शूरस्त्वसुभगोधनवल्लभः॥दक्षःक्रूरोमहाकायश्चाश्विनेजायतेनरः॥१॥भरण्यांचेअवक्ताश्चअभोगीसु
१५ स्थिरोभवेत्॥समाढोमानिमांश्चैवसत्यवाक्यदृढव्रतः॥२॥तेजस्वीनीतिमांश्चैवबहुफक्कजनवल्लभः॥ग
भीरःकुशलोमानीवह्निनक्षत्रजःशुचिः॥३॥सुरूपस्थिरधीर्मानीभोगभागुरुरतःप्रिय॥प्रियवाक्चतु
रोदक्षःतेजस्वीधातृधिष्ण्यजः॥४॥उत्साहीचपलोभीरुधनीमानीप्रियःशुचिः॥आगमज्ञःप्रभुर्दक्षश्च
द्रनक्षत्रजोनरः॥५॥अविचारपरःशूरोनिपुणःक्रयविक्रये॥गर्विहिंस्रःक्रूरतनुःकृतघ्नःशिवधिष्ण्य
जः॥६॥दुर्मेधधान्यदर्शनीयःपरस्त्रीकार्यनैपुण॥सहिष्णुरल्पसंतुष्टोशीघ्रगोदितिधिष्ण्यजः॥७॥
अविकामीमहापुण्यश्चंचलःस्थिरधीःसुखी॥पुष्यनक्षत्रसंजातःसर्वशास्त्रविशारदः॥८॥सुरूपःसु
भगःक्रूरःपरस्त्रीनिरतःषटः॥भवक्ताव्यसनाक्रांतसार्पनक्षत्रजोनरः॥९॥क्रूरःस्थूलहनुःकोपीवक्ताश्च
र्यसहन्प्रभुः॥सुरगर्वर्वितनरतस्तेजस्वीपितृधिष्ण्यजः॥१०॥कृतिमांश्चधनीदानानुरक्तःशास्त्रविशारदः॥

कार्याकार्यविचारज्ञोभाग्यनक्षत्रजोनरः ॥ ११ ॥ जितशत्रुः सुखीभोगीनित्यशः प्रमदाप्रियः ॥ कलाभिज्ञः सत्पुर
नः सुविद्वान्धर्मर्क्षजः ॥ १२ ॥ कृतविद्यश्च सुभगोधनाढ्यः साहसीभवेत् ॥ परोपकारीसर्वज्ञोहस्तेजातोनरोभवे
त् ॥ १३ ॥ चित्रमाल्यांबरधरः कामशास्त्रविशारदः ॥ कांतिमान्धनवान्भोगीपंडितस्त्वाष्ट्रधिष्ण्यजः ॥ १४ ॥ धार्मि
कः सत्यवाक्शूरः क्रयविक्रयनैपुणः ॥ कामीबहुक्रतुर्दांतोविद्यावान्मरुतर्क्षजः ॥ १५ ॥ अभ्यसूयापरः सूक्ष्म
कृपालुरनिनिंदितः ॥ जितेंद्रियोर्थवान्लुब्धोविशाखाधिष्ण्यसंभवः ॥ १६ ॥ नृपकार्यरतः शूरोविदेशस्थोंगना
प्रियः ॥ सुरूपश्छिन्नपापश्चभवन्मैत्राख्यधिष्ण्यजः ॥ १७ ॥ बहुव्यग्रकरः क्लेशसहकामीदुरासदः ॥ क्रूरश्चेष्टाम
षाभीतोधनवानिंद्रधिष्ण्यजः ॥ १८ ॥ साधुमानीधनीभोगीपरकार्योपकारकः ॥ मिथ्योपचारः स्त्रीलोकः श्ल
क्ष्णोनिर्ऋतिधिष्ण्यजः ॥ १९ ॥ सुसुखीसुविनीतश्चत्यागीस्याद्बहुवत्सलः ॥ क्लेशभोगीयुवामानीजलनक्ष
त्रसंभवः ॥ २० ॥ कृतज्ञोधार्मिकः शूरोबहुपुत्रविनीतवान् ॥ सुकलत्रः सुरूपश्चवैश्वनक्षत्रसंभवः ॥ २१ ॥

य. उदारःश्रुतवान्धीरःविद्वान्वक्ताधनान्वितः॥ कलावान्सकलाभिज्ञोधार्मिकःश्रवणर्क्षजः॥ २२॥ध ना.
११ निष्ठोव्यसनीक्रूरोक्षयरोगयुतःखलः॥ परदाररतःशूरोधनिष्ठासंभवेन्नरः॥ २३॥शततारार्क्षजनिर्धनस्त
कुशीलिदारलंपटः॥ मायावापिविशालश्चसौख्यभोक्तृषनउच्यते॥ २४॥ उद्विग्नस्त्रीजितःशाठ्यपर-
निंदाकनैपुणः॥ अधर्मनरतःशूरश्चाजपादेत्तसंभवः॥ २५॥ प्रजावान्धार्मिकोवक्ताजितशत्रुः-
सुखभरः॥ हृद्भतोसदाकार्य॥ चाहिर्बुध्न्यसमुद्भवः॥ २६॥ रूपवान्धनवान्भोगीपंडितश्चज-
लार्थभाक्॥ कामीदुर्गजितःशूरःपौष्णजःपरदेशगः॥ २७॥ ॥इतिनारदीयसंहितायांनक्ष-
त्रफलं॥ ॥अथयोनिफलं॥ ॥अश्विनीशततारकाअश्वयोनिः॥ फलं॥ चंचलश्चपलोहृष्टः
शीघ्रगामीरणप्रियः॥ अश्वयोनौतुसंजातोबलवान्स्वामिवल्लभः॥ १॥ भरणीरेवतीगजयो
निः॥ फलं॥ मंदगामीबलाढ्यश्चबहुस्त्रीराजवल्लभः॥ सत्यवान्ज्ञानवांश्चैवगजयोनौभवेन्नरः॥ २

कृ ३ पु ८ अजायोनि :॥ फलं ॥ दुर्जनंदुर्घदस्छानंभेदवानविशंविन :॥अजायोनि प्रजानोसोब-
हुवृत्थिकरो भवेत्॥ ३ ॥ रो ४ मृ ५ सर्पयोनि :॥ फलं ॥दर्शनाड्झिनिंदनित्यंरवदारोपोनवर्नंते ॥प
रवेश्मापहारीन्चसर्पयोनौप्रजायते ॥ ४ ॥ आ ६ मू १९ अश्व योनि :॥ फलं ॥ सर्वभक्षीवृथावादी-
धूर्तः स्वामिहिनेरन :॥ अरण्यांगंदुःखमहोश्वानयोनौभवेन्नरः॥ ५ ॥ पु ७ आ ९ मार्जारयोनि:
॥ फलं ॥पिंगाक्षःसर्वभक्षीच्चवंचलोद्वेषकारकः॥ मार्जारयोनिसंजा नोवृथाकोपिभयान्वितः
॥ ६ ॥ म १० पू ११ मुषकयोनि :॥फलं ॥ धूर्तस्वकार्यनिरतः परकार्यविनाशकः॥शत्रुणांमूलव-
च्छेचानरोमुखकयोनिजः॥ ७ ॥ उ १२ उ २६ पशुयोनि :॥फलं ॥ गोधनैर्बहुभिर्युक्तः क्षीराहारोति
सुंदरः॥परकार्यप्रकर्ताच्चपशुयोनिनरो भवेत्॥ ८ ॥ ह १३ स्वा १५ महिषीयोनि :॥ फलं ॥ मंदगा-
मीस्थूलतनुर्बव्हाशीबलवान्भवेत्॥ बहुक्षीराज्यभोगीच्चमहिषीयोनिसंभवः॥ ९ ॥ चि १४ वि १६



य
१२

व्याघ्रयोनिः॥ फलं॥ कृतांतः सर्वभक्षी च निघाघवान् कुशलो भवेत्॥ व्याघ्रयोनौ नरो जातो दर्शनाद्भयदो श्री
महान्॥ १०॥ अ १७ ज्ये १८ मृगयोनिः॥ फलं॥ गीतवाद्यप्रियो नित्यं संकटस्थश्चारुदर्शनः॥ मृगसा
भिरतो धूर्तो मृगयोनौ नरो भवेत्॥ ११॥ मू २०॥ श्र २२ कपियोनिः॥ फलं॥ पिंगाक्षश्चपलो व्यय
गामी च पल्यवान् भवेत्॥ न विसो नरकश्चित् कपियोनिसमुद्भवः॥ १२॥ पू २० अभिजित् नकुलयोनिः
फलं॥ चारुदर्शनकार्यार्थी परकार्यार्थसादरः॥ गृहवासी चिरायुस्यान्नरो नकुलयोनिजः॥ १३॥ ध २३
पू २५ सिंहयोनिः॥ फलं॥ महाबली च पिंगाक्षः कृष्णोमध्ये भयानकः॥ सिंहयोनौ भजानस्कसर्वेम
सर्वभक्षी समुद्भवः॥ १४॥ इति यवनजातके योनिफलं॥ अथ गणफलं॥ गुरुदेवद्विजाली नामकः
शास्त्रविमर्षकः॥ देवतासदृशी मूर्तिर्जातो देवगणो भवेत्॥ १॥ तामसः पापकृद्द्वेषी धर्मस्थः कल
हप्रियः॥ निष्ठुरश्छिन्नपापश्च गणोस्याद्राक्षसे नरः॥ २॥ अन्नदानाधनाढ्यश्च भजावान् देवपूजकः



॥ मानुषर्क्षेनरोजातोवस्त्रस्त्रीसुखभोगकः॥ २॥ ॥इतिगणफलं॥ ॥अथयवनजातकेयोग-
फलं॥ ॥स्वदारापरितुष्टश्चगृहकार्येषुनिश्चितः॥स्वतंत्रःसर्वकार्येषुविष्कंभेजनयेशुचिः॥ १ ॥
सुरूपश्चप्रियवचोधनधान्यसमन्वितः॥प्रगल्भोमनसातुष्टोप्रीतियोगेचजायते॥ २॥ भीनिस्त्रस्यस्त्र
चिस्तस्यजलक्रीडापरायणः॥ आयुरारोग्यवांश्चैवआयुष्मयोगसंभवः॥ ३॥ बहुवाक्यबहुनरोनि
र्गुणःसर्वकर्मसु॥गंधप्रियश्चसुभगोसौभाग्येजायतेनरः॥ ४ ॥लक्ष्मीवान्गुणवांश्चैवशोभनेयुक्तः
सदाशुचिः॥शोभनेचनरोजातोधूर्तश्चकीर्तिवत्सलः॥ ५ ॥परापवादनिपुणःसत्वहीनःसदालसः॥प
रदाररतःकामीअतिगंडेभवेद्यदि॥ ६॥प्रजावान्गुणवांश्चैवब्रह्मकर्मरतःशुचिः॥न्यायकर्मरतोनि
त्यंसुकर्मणिभवेद्यदि॥ ७॥धार्मिकःसत्यवादीचदृढचित्तःसलोचनः॥क्रूरःपटुमतिश्चैवधृतियोगेप्र
जायते॥ ८॥असत्यवादीपिशुनश्चलचित्तोतिनिष्ठुरः॥शूलयोगेनरोजातोशूलवांजायतेध्रुवं॥ ९॥ वा

प०
१२

चालं:सत्यहीनश्चक्रूराभाकुकलहप्रिय:॥स्फुस्थिर:सुभगोगंडनरोजातोसमाहित:॥१०॥महामतिस्थिर आ
श्चंडसत्यवादीजितेंद्रिय:॥वृद्धियोगेनरोजातोधनवान्ज्ञानवान्भवेत्॥ ११ ॥ध्रुवकार्येसदाकर्ताशत्रुपी
डाविवर्जित:॥ध्रुवयोगेनरोजातोध्रुवकार्येमहामति:॥१२॥धूर्तोमलिनचित्तश्चपरकार्यविनाशक:॥निष्ठु
रोमदभोगीनव्याधानिजायतेयदि॥१३॥भोक्तागोधनवांश्चैवसर्वज्ञश्चगुणान्वित:॥तेजस्वीपित्तसाहश्चोह
र्षयोगेप्रजायते॥१४॥स्फुस्थिर:सत्यसंपन्नोबुद्धिमांश्चगुणान्वित:॥तेजस्वीपित्तसादृश्योवज्रयोगेप्र-
जायते॥१५॥कुलिन:सत्यसंपन्नोदृढवाक्योमहामति:॥संसित्य:सर्वकर्तासिद्धियोगेप्रजायते॥१६॥स्थिर:
कार्यकरोनित्यंपरकार्यविनाशक:॥असत्यवादीमूर्खश्चजननंव्यतिपातके॥१७॥कुलेश्रेष्ठ:सत्यवादीभोगी-
मित्रजनप्रिय:॥धनधान्यसमृद्धश्चवरीयान्योगेप्रजायते॥१८॥पापबुद्धिर्दुराचारोप्रलुब्ध:साहसीनर:॥मलिने
मंदरेहश्चपरिघेजननंयदि॥१९॥प्रसन्नवदनोधीर:सर्वव्यापारकोविद:॥धनाढ्योर्नीतिमांश्चैवशिवयोगेप्र-
जायते॥२०॥सिद्ध:सर्वेषुकार्येषुपरकार्यप्रकारक:॥गुरुदेवद्विजानांचसिद्धियोगेप्रजायते॥२१॥विविध-



१२

व्ययवान्सुशील : स्वामिभक्तो महामतिः ॥ गंधप्रियः सदोदारः साध्ययोगे प्रजायते ॥ २२ ॥ सुभगो धार्मिको
लोकेश्वरस्सत्यसमन्वितः ॥ प्रणतः प्रियकारी च शुभयोगे प्रजायते ॥ २३ ॥ सत्यवान्सुमतिः कांतो धनी नासु
मतो नरः ॥ सर्वकार्येषु कुशलो शुक्लयोगे प्रजायते ॥ २४ ॥ प्रियवाक्दानदः सत्यब्रह्मज्ञो ब्राह्मणप्रियः
॥ प्रगल्भो निर्मलो धीरः ब्रह्मयोगे प्रजायते ॥ २५ ॥ धनवांश्च महाभोगी राजकर्मगुणान्वितः ॥ योगी सर्वगु
रुः कार्की ऐंद्रयोगे प्रजायते ॥ २६ ॥ मलिनः पिशुनश्चैव बहुभाषणतत्परः ॥ परदाररतो नित्यं जायते
योगवैधृतौ ॥ २७ ॥ ॥ इतिश्रीयवनजातके सिध्दांतरे योगफलानि ॥ ॥ अथकरणफलं ॥ ॥ मंदशी
घ्रउदारश्च सुखवान्धनवर्जितः ॥ बवाख्ये करणे जातो भवेत्सेनापतिर्नरः ॥ १ ॥ सुधीरः सुभगस्त्यागी-
बाललीलारतः सुखी ॥ बालवे यदि जातस्स्यात्बालकर्मरतः सदा ॥ २ ॥ प्राछनकौटलेयस्स्यात्कौलुकानंदव
र्धनः ॥ पापकर्मरतः सौख्यात्कौलवे जननं यदि ॥ ३ ॥ सात्विकः सत्यसंपन्नो स्थिरः श्चंडः प्रतापवान् ॥ ता
मसो मलिनः स्रष्टो जातस्स्यात्तैतिले सदा ॥ ४ ॥ मंत्रवान्सुमतिर्मांदक्षो दुर्बलो बहुभाषणः ॥ चपलः कलहर



प.
१४
तोगरारव्येजायतेनरः॥ ५ ॥नानापण्यवशारज्ञोवणिक्कर्माभिजीवकः॥वणिजारव्येनरोजातोवणिक्कर्म जा.
रतोभवेत्॥ ६॥क्रूरःसाहसिकश्चंडःपापकर्मरतःखलः॥अभ्दूतःसर्वकार्येषुविस्थ्यारवेचभजायते॥ ७ ॥स
दोद्योगकरःशांतोसदादानीमहामतिः॥शकुनारव्येजातनरःशाकुनज्ञोविशेषतः॥८॥कृषिवाणिज्यकार्य
त्सदोद्योगीकुलकुस्मः॥निरालसःसत्ययुक्तोजातश्चैवचतुष्पदे॥ ९॥नानाधातुविशेषज्ञःस्वकर्मगुणवान्भ
वेत्॥नागारव्यकरणेजातोनागानांपवनेरतः॥ १०॥ किंस्तुघ्नकरणेजातोपापकर्मानथामतिः॥क्रूरःषंदो
दरिद्रीस्यान्नामभावेनतत्फलं॥ ११॥ ॥इतिश्रीयवनजातकेसित्थांतरेकरणफलं॥ ॥अथराशिफलं॥
॥ ॥अथयवनजातकेतत्रादौमेषराशिगुणाः॥ ॥पुत्रवान्भाग्यवान्नृपः परोपकरणेरतः॥राजपूज्योधर्म
मेरतःशुभो गीशीलवान्भवेत्॥ १ ॥द्विभार्यश्चपलस्तेयीभीरुर्वर्षज्वरीभवेत्॥प्रथमे १सप्तमे ७वर्षे
वत्सरेचत्रयोदशे॥ २॥तृतीये३वत्सरेतोयपूर्णभांडेनिमज्जति॥द्वादश१२ब्देतथानद्यां षोडशाब्देलसत्सू-
कृत्॥ ३॥पंचविंशति२५वर्षेचतस्यायकविबाधता॥विषूचिकाभयंसप्तदशे१७द्वात्रिंश३२वत्सरे॥ १४

॥४॥शस्त्रयानेनतीव्रेणस्वल्पमृत्युर्भविष्यति॥शुभग्रहावलोकेनजीवेन्नवति ९० वत्सरे॥ ५ ॥कार्तिकेबहुले-
पक्षेनवम्यांबहुरात्रके॥बुधेन्हिशीर्षमूलेलंनिधनंचभविष्यति॥ ६॥ इतिमेषराशिगुण:॥ ॥अथवृषभराशिगु
ण:॥ ॥कृपणश्चार्थवांश्चैव आपजीस्त्रियाजिता:॥अदातापरकामीचस्थिर:सत्यरत:प्रिय:॥१॥ द्विबु
कस्तनमध्येवाकिंचिद्चिह्नंप्रदृश्यते॥ वर्षे ३ज्वरी वर्षे २सव्यचरणेअग्निभयं॥वर्षे ९ज्वरी वर्षे २५उदकभयं॥
वर्षे १९अल्पमृत्यु:॥वर्षे १९ द्विभार्य: वर्षे ९६आयु:॥माघमासेशुक्लपक्षेनवम्यांभृगुवासरे॥नक्षत्रेरोहिणी
संज्ञेनिधानंतस्यनिर्दिशेत्॥ ॥इतिवृषभराशिगुण:॥ ॥अथमिथुनराशिगुण:॥ ॥कुटुंबवत्सलश्चैवस्त्रीणां
कौतुहलप्रिय:॥वयस्याद्येसुखीमध्येवयस्यंतुचमध्यमे॥ १॥द्विभार्योगुरुदेवानांपूजकोगुणवान्सुखी॥ वर्षे ५
वृषभ यं वर्षे १६उदकभयं॥वर्षे १८ वर्णरोग:॥वर्षे २१अल्पमृत्यु:॥वर्षे ७७आयु:॥वैशाखेशुक्लपक्षेचद्वाद
श्यांबुधवासरे॥मध्यान्हेहस्तनक्षत्रेमृत्युस्तस्यविनिर्दिशेत्॥ ॥इतिमिथुन:॥ ॥अथकर्कराशिगुण:॥ ॥
संग्रहीसर्ववस्तूनांपुत्रवान्शीलवान्गुणी॥कार्यकर्तापितुर्मातुर्भक्त:स्त्रीजितमृत्युवान्॥ १ ॥ वर्षे ७ज्व

य·
१५ जा·

री॥ मासभागेग्निभयं॥ वर्षे ३ शिश्नेतिरुक्॥ वर्षे १९ सर्पभीः॥ पंचबांधवाः॥ वर्षे ३२ अल्पमृत्युः॥ वर्षे ९४
आयुः॥ माघेसितेनवम्यांतुरोहिण्यांनिधनंभृगौ॥ ॥इतिकर्कराशिगुणः॥ ॥अथसिंहराशिगुणः
॥ ॥धनधान्ययुतःश्रीमान्विक्रमीनिजसायुतः॥ माघमासप्रियोमिष्टान्नभोजीचकलानिधिः॥१॥
वर्षे १ बाधा॥ वर्षे १ दक्षिणहस्तपादेअग्निभयं॥ वर्षे १२ विषूचिकाभयं॥ वर्षे ५ गोभयं॥ वर्षे ७ ज्वरः॥
वर्षे ३२ अल्पमृत्युः॥ ॥इतिसिंहराशिगुणः॥ ॥अथकन्याराशिगुणः॥ ॥अर्थवान्रूपवान्मानीनि
यस्याद्बहुविक्रमः॥ वर्षे ५ वामनेत्रेरोगः॥ वर्षेत्रीणिअग्निभयं॥ वर्षे ९ ज्वरः॥ वर्षे २१ भयपतनं॥ बहुस्त्रि
यः॥ स्त्रीबंधः॥ शिश्ने २१ लांछनः वर्षे १३ महापीडाविषूचिसंभवः कंठलांछनंच वर्षे १५ सर्पभयं वर्षे
२० अरण्येशस्त्रघातः॥ नित्यंप्रवासी वर्षे ८० आयुः कृष्णत्रयोदशीचैत्रेरविवारेमृतिर्भवेत्॥ ॥इति
कन्याराशिगुणः॥ ॥अथतुलराशिगुणः॥ ॥विद्वद्वादीलोकपूज्योवस्त्रकयाहीसलक्ष्मीवान्॥ वापीकू
पतडागादिदेवतागारकारकः॥ द्विभार्यः॥ वर्षे ७ अग्निभयं॥ वर्षे ८ ज्वरः॥ वर्षे १२ उदरभयं॥ वर्षे २१

अल्पमृत्युः वर्षे २० वृक्षपातः तुरंगतोवा स्वल्पबंधः वर्षे ८५ आयुः वैशाखस्यसिनेपक्षेसर्पदंशेभ्रूकनेमृतिः
॥ ॥इतितुलराशिगुणः॥ ॥अथवृश्चिकराशिः॥ ॥संसंतुष्टसदाक्रोधीद्वेषीच कलहप्रियः॥परतापकरो
मित्रद्वेषीविश्वासघातकः॥वर्षे १५ ज्वरः वर्षे ३ अग्निभयं॥वर्षे २५ अल्पमृत्युः॥चतुर्वेधुक्तनः॥वर्षे ६० का
शीगमिष्यति॥द्विभार्यः॥बहून्यपत्यानि॥वर्षे ९० आयुः॥ज्येष्ठस्थकृष्णदशम्यांवबुधेहस्तेमृतिर्भवेत॥ ॥अथ
धनराशिगुणः॥लोकप्रियोराजमान्यःसर्ववस्तुसंग्रही॥ क्षत्रजित्पंडितोमानीद्विभार्यःपुत्रवत्सलः॥१॥
वर्षे १ महारोगी॥वर्षे १३ अपमृत्युः परस्त्रीलंपटः॥प्रथमेवयसेश्रीमान्बंधुभिःसहितोनरः॥४॥वर्षे ७५
आयुः शत॥१०० युर्वा॥शतायुःश्रभद्रस्यास्यादाषाढेकृष्णसप्तमे॥पंचम्यांश्रवणयुतेवत्सरेमरणंशनो॥
॥इतिधनराशिः॥ ॥अथमकरराशिगुणः॥ ॥विचक्षणःकर्मकर्ताबहुपुत्रसमन्वितः॥अनृती ७ मेवर्षे
वारिभीस्यान्नसंशयः॥ १ ॥वर्षे १० वृषपातः॥वर्षे २१ ज्वरः वर्षे ३३ अपमृत्युः वर्षे ५ पीडा वर्षे २५
३० वामांगेअग्निभयं॥शुभदृष्ट्याशतायुष्यादशम्यांश्रवणेसिते॥भौमेन्हिमरणंज्येष्ठेरुक्षेवान्नात्रसं

य
१८

शय:॥ ॥इतिमकर:॥ ॥अथकुंभराशिगुण:॥ ॥उद्योगीरुक्षदेहोप्रथुतरगोनदामानिमत्त
क:सद्देहोथसंहीन:परकलत्रजनक:स्थूलदेह:कुनेत्र:॥शाठ्योलस्याभिभूतोविपुलसुखकरादि:शिल्पविद्या
कश्चज्योदु:शीलोदु:खकृत्कोघटमृदुपगनेशैशिनाथेदरिद्र:॥ १ ॥ ॥इतिकुंभराशिगुण:॥ ॥अथमी
नराशिगुण:॥ ॥शिष्योनत्यासहिवादेप्रियजनरहित:शास्त्रविद्वन्दहोगेयज्ञोधर्मनिष्ठोबहुफलपिद्ध
न:सौख्यभाक्भूपसेवी ॥ईषत्कोपेनमर्षे:सकलनिधिधनभाक्स्त्रीजित:शुद्धभावोयानासक्त:समुद्रे
निमिग्रुगलगनेशीनगोदानशील:॥ ॥इतियवनजातकेमीनराशिगुण:॥ ॥अथग्रहभावफलानि ॥
॥ ॥दु:खंसकरखंतथोद्वेग:कांतिसौख्यंधनंतथा॥दु:खंहानिस्तथादु:खं लग्नेरव्यादिकंफलं॥ १ ॥दु:
खंधनंतथाहानि:सौख्यंलाभंधनंतथा॥हानिर्नाशस्तथादु:खंधनेरव्यादिकंफलं॥ २ ॥सौख्यंकार्यंमहा
नुकोप:सिद्धि:सौख्यंप्रियांकरं॥हानिर्दु:खंतथादु:खंतृतीयेफलमीरितं॥ ३ ॥दु:खंकरंतथाहानि

जा

सुखंसौख्यंतथाधनं ॥ दुःखंदुःखंतथादुःखंसहस्थानेफलंस्मृतं ॥ ४ ॥ दुःखंसुखंतथादुःखंपुत्रंद्रव्यंतथा
धनं ॥ दुःखंदुःखंतथादुःखं। पुत्रस्थानेफलंस्मृतं ॥ ५ ॥ सुखंदुःखंसुखंदुःखंसुखंदुःखंसुखंदुखं ॥ सुखं
चैवरिपुस्थानेग्रहाणांफलमीरितं ॥ ६ ॥ हानिंसुखंतथादुःखंसुखंमानसुखंतथा ॥ दुःखंहानिस्तथादुःखंजा
यास्थानेफलंभवेत् ॥ ७ ॥ सूर्यादिनवखेटस्यमृत्युस्थानेयदानदा ॥ विरुद्धंफलमेवस्यान्नात्रकार्यविचार
णा ॥ ८ ॥ अत्रअष्टमस्थानेशुभग्रहाश्चेन्नराकिंचिदिष्टफलं ॥ दुःखंसुखंतथादुःखंसुखंसौख्यंसुखंतथा-
॥ दुःखंहानिस्तथादुःखंधर्मस्थानेफलंस्मृतं ॥ ९ ॥ दुःखंसुखंतथादुःखंसुखंमानस्तथासुखं ॥ दुःखं-
दुःखंमानहानिःकर्मस्थानेफलंस्मृतं ॥ १० ॥ राजमानोबहुधनंराजसौख्यंशुभंशुभं ॥ धनंकीर्तिःसु-
कीर्तिश्चयशआयेफलंस्मृतं ॥ ११ ॥ विशालनेत्रकाणश्चपापंदारिद्र्यमेवच ॥ कुशीलत्वयस्तीक्ष्णतान्वनी
मस्त्रीब्रोव्ययस्मृतं ॥ १२ ॥ ॥ इतिग्रहभावफलानि ॥ ॥ खचरस्यभुक्तभोग्यभागाःखस्त्र

प. ६० भागनिभाजिता: क्रमेण ॥ यानेष्यदिनै: प्रयांतिराशिंखचरेचक्रिणितत्क्रमादिलोमं ॥ १ ॥ ख- ज.
३७ चरगोग्रहत्याचे भुक्तअथवाभोग्यभागघेऊनरवरसजेषष्टि ६० यांहींगुणूनग्रहाचेगतीनेभागदी-
जे ॥ आलेलब्धनेदिवसघटीजाणिजे ॥ त्यादिवसघटीवरूनजेदिवसगणनाहोईलनीकरूनमागेंअ-
थवापुढेंग्रहअन्यराशीनाढाईजाईल ॥ वक्रीग्रहअशिलातरीपुढीलकरणेतरीविलोमजाणिजे ॥ ७ ॥
देवब्राह्मणवंदनाद्गुरुवच:संपादनात्सत्यहंसाधुनाभिभाषणात्श्रुनिरव:श्रेय:कथाकर्णनात् ॥
होमाद्ध्वरदर्शनात्शुचिमनोभावज्जपादाननोनोकुर्वैतिकदाचिदेवपुरुषस्यैवंग्रहा:पीडनं ॥ १ ॥
पापिष्ठायेदुराचारादेवब्राह्मणनिंदक: ॥ अपथ्यभोजनस्तेषामकालमरणंध्रुवं ॥ २ ॥ येपथ्यभोज-
नरता० ॥ ॥ अथपत्रिकाक्रम: ॥ ॥ आशीर्वादश्लोक ॥ ॥ जन्मकाल: ॥ ॥ प्राकृतजन्म ॥ ॥
यात्रादेवर्जं ॥ जातस्यजंतो:षट्धिष्ण्यानि ॥ तत्कालिकाग्रह: ॥ ग्रहजापकालार्थंजन्मकुंडली ॥ ॥ ३७

अथभावफलानि ॥ ॥पंचांगफलानि ॥ ॥अष्टोत्तरीदशानुक्रमः॥ ॥इतिय्यवनजातकंसमाप्तं ॥ ॥
॥हेंपुस्तकमुंबईंतहरीबापूजीजोशीसंगमेश्वरकरयांणीछापविलेंअसे॥ ॥छ॥ ॥छ॥
॥शके १७८८ क्षयनामसंवत्सरे ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥-



इतियवनजातकसमाप्तः॥